**दिनाङ्क : - 25.01.2025** **प्रात: - 06:55**

**इयम् आकाशवाणी**

**सम्प्रति वार्ता: श्रूयन्ताम्**

**प्रवाचिका – निधिः झा**

**अथ वार्ताः**

**भारत-इण्डोनेशिया-वार्ता**

अद्य नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी, इण्डोनेशिया-देशस्य राष्ट्रपतिः प्रबोवो सुबिआन्तो च मन्त्रयेयाताम् । उभौ नेतारौ द्विपाक्षिकसन्धेः विस्तृतसमीक्षां करिष्यत: सममेव परस्पर-हितस्य क्षेत्रीय-वैश्विक-विषयेषु चर्चां च करिष्यत:। वार्तायाः अनन्तरं अनेकेषु सन्धिपत्रेषु हस्ताक्षराणि भवितुम् अर्हन्ति। अवधेयं यत् राष्ट्रपतिः सुबिआन्तो भारतस्य चतुर्दिवसीयायां राज्ययात्रायाम् गुरुवासरे नवदिल्लीं प्राप्तवान्।

अद्य प्रातः राष्ट्रपतिभवनस्य अग्रभागे इण्डोनेशिया-देशस्य राष्ट्रपतिः वर्यस्य औपचारिकं स्वागतम् भविता। सः राजघाट् इत्यत्र महात्मगान्धी-वर्यस्य समाधौ श्रद्धाञ्जलिम् च समर्पयेत्। राष्ट्रपतिः प्रबोवो श्वः कर्तव्यपथे षट्सप्ततितमे गणतन्त्रदिवसस्य समारोहे मुख्यातिथिः भविष्यति।

राष्ट्रपतिरूपेण श्रीप्रबोवो-वर्यस्य प्रथमा इयं भारतदेशस्य यात्रा अस्ति। भारत-इण्डोनेशिया-देशयोः मध्ये सहस्रवर्षेभ्यः अपि अधिकाः मैत्रीपूर्णाः सम्बन्धाः सन्ति।

**राष्ट्रपतिः- गणतन्त्रदिवस**

राष्ट्रपतिः द्रौपदी मुर्मू अद्य गणतन्त्रदिवसस्य पूर्वसन्ध्यायां राष्ट्रं सम्बोधयिष्यति। अयं अभिभाषणः सायं सप्त वादने आकाशवाण्या: दूरदर्शनस्य च सर्वास्वपि वाहिनीषु हिन्दीभाषायां प्रसारितः भवेत् , तदनन्तरं आङ्ग्लभाषायां च प्रसारणं भविता । दूरदर्शने हिन्दी-आङ्ग्ल-भाषयोः भाषणस्य प्रसारणं, तदनन्तरं दूरदर्शनस्य क्षेत्रीय-वाहिनीभिः प्रादेशिक-भाषासु प्रसारितं भविता। आकाशवाणी अपराह्णे सार्धनववादने प्रादेशिकभाषायाः संस्करणानि स्वीये प्रादेशिक अन्तर्जालीय माध्यमेषु प्रसारयिष्यति।

**राष्ट्रिय-मतदाता-दिवसः**

अद्य अशेषे हि देशे पञ्चदशतमः राष्ट्रिय-मतदाता-दिवसः आचर्यते। राष्ट्रपतिः द्रौपदी मुर्मू नवदिल्ल्यां मुख्यकार्यक्रमे भागं गृह्णीयात् । केन्द्रीय-विधि-न्याय-मन्त्री अर्जुनराम-मेघवालः, मुख्य-निर्वाचन-आयुक्तस्य अधिकारिण: च अस्मिन् कार्यक्रमे उपस्थिता: भवितार:।

अस्य वर्षस्य विषयः, 'मतदानम् इव किमपि नास्ति, अहं निष्चप्रचं मतदानं करोमि' "Nothing like voting, I Vote for Sure" इति अस्ति। विषयोऽयं जनान् मतदानं कर्तुं प्रोत्साहयति। राष्ट्रपतिः मुर्मू, राज्य-मण्डल-अधिकारिणां कृते सुगमं निर्वाचनं सुनिश्चेतुं अनुकरणीयप्रयासानां कृते सर्वोत्तम-निर्वाचन-आचरण-पुरस्कारान् प्रदास्यति।

## राजनाथसिंहः-सञ्जयः

रक्षामन्त्री राजनाथसिंह: ह्यः नवदिल्ल्याम् युद्ध-क्षेत्र-निरीक्षण-प्रणाल्या: सञ्जय इत्येतस्या: शुभारम्भं अकरोत्। इदं हि निरीक्षण-प्रणाली युद्धक्षेत्रस्य पारदर्शितां संवर्धयिष्यति अथ च भविष्यस्य युद्धक्षेत्राणि परिवर्तयिष्यति यतोहि इदं हि खलु अत्याधुनिक-संवेदक-यन्त्रै अत्याधुनिक-विश्लेषण-यन्त्रैश्च संवलितास्ति। प्रणाली एषा अस्मिन् वर्षे मार्चमासात् आरभ्य भारतीयसेनायां त्रिषु चरणेषु सम्मिलिता भविष्यति। रक्षामन्त्रालयानुसारि अनया प्रणाल्या गुप्तचरविभागा: तत्सम्बद्धानि अन्वेषणकार्याणि इतोऽपि संवर्धिष्यन्ते। अपि च भारतीयसेनायां दत्तांशस्य आन्तार्जालिक-सञ्चालनस्य च दिशि नवीन: पदक्षेपो

## महाकुम्भ

उत्तरप्रदेशस्य मेलाप्रशासनेन महाकुम्भे मौनी अमावस्यायाम् अमृतस्नानाय व्यापकी सज्जता कृता अस्ति। दशकोटितोप्यधिक सङ्ख्याकानां: भक्तानाम् आगमनस्य सम्भावनाम् अवलोक्य तेषां च गतिं नियन्त्रयितुं दिङ्निर्देशाः दत्ताः सन्ति। घाट्टेषु जनसम्मर्दं नियन्त्रयितुं आवश्यक-संसाधनानि नियोजिताः भविष्यन्ति। घाट्टेषु उत्तमसुविधाः, सुरक्षा, स्वच्छता, शौचालयः, वाहन स्थापनव्यवस्था च सुनिश्चिता भविष्यति।

## क्रिकेट

पुरुष-क्रिकेट्-क्रीडायां, भारत-इङ्ग्लेण्ड्-देशयोः मध्ये द्वितीया टि-20- क्रीडा अद्य चेन्नै-नगरस्य एम्. ए. चिदम्बरम्-क्रीडाङ्गणे भविता। क्रीडा सायं सप्त वादने आरभेत् ।

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धैः विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: श्वः मध्याह्ने सार्धैक-वादनत:भविष्यति।

**।।इति वार्ता:।।**